# तृतीयोऽध्यायः

# तृतीयोऽध्यायः

## (कात्यायन-कर्क-याज्ञिकदेव-विद्याधराचार्याणां परिचयः वैशिष्ट्यपरिशीलनम्)

### ३.१. कात्यायनस्य परिचयः

महर्षेः कात्यायनस्य विषये सन्ति विद्वत्सु विप्रतिपत्तयः। शुक्लयजुर्वेदस्य श्रौतसूत्रं महर्षिणा कात्यायनेन प्रणीतम्। एवं कात्यायनः याज्ञवल्क्यस्य पुत्रः याज्ञवल्क्यस्य द्वितीयायां पत्न्यां कात्यायन्यां प्रसूतः। कात्यायन सूतं प्राप्य वेदस्य सूत्रस्य कारकम्[१०९] इति स्कन्दपुराणे लिखितम्। यज्ञविद्यायां प्रवीण एष आसीत् यज्ञविचारमुखाः बहवो ग्रन्थाः ग्रन्थिताः अनेन। न केवलं स्वशाखोपयुक्तानां ग्रन्थानां निर्माणं कृतमनेन अपि तु परशाखोपयोगिनां ग्रन्थानामपि। अत एव पारक्यं करोतीति व्युत्पत्या अन्वर्थमेव तस्य नाम पारस्कर इति ख्यातिमगात्। बह्वचार्यसिंहइत्यापरापदवीसंप्राप्तानेनान्यशाखासुग्रन्थ प्रणयनात्। बह्वचार्यसिंहेन कात्यायनमहर्षिणा इति ऋक्सर्वानुक्रमभाष्ये षड्गुरुशिष्यः [११०]। आश्वालायन सर्वानुक्रमणभाष्येऽस्योल्लेखो दरीदृश्यते। "एकोहि शौनकाचार्यशिष्योभगवान् कात्यायनः"[१११] अनेन कात्यायनमहर्षिणा वटनगरक्षेत्रे वास्तुपदं नाम तीर्थं महागणपतिपीठमनयोर्द्वयोः संस्थापनं कृतमिति स्कन्दपुराणे वर्णितमस्ति।

एकस्तावत्कात्यायनः येन शुक्लयजुर्वेदान्तर्गता कात्यायनीया शाखा प्रवर्तिताः। स च श्रुतर्षिः वेदशाखा प्रवर्तकः। अपरश्च याज्ञवल्क्यसुतो महर्षिकात्यायनः सूत्रकारः। अयमेवाष्टदशपरिशिष्टानां प्रणेता। एष विश्वमित्रगणान्तर्भूतः कतगणान्तर्गतस्तस्य प्रवराः[११२] वैश्वामित्रकाल्याकैलेति विद्यन्ते सोहं कौशिकपक्षः शिष्य इति तेन स्वयमेवाभिहितं तृतीये

---

१०९. का.प.द., भूमिका, पृ. २।

११०. पूर्ववत्, पृ.२।

१११. पूर्ववत् पृ.२।

११२. औदुम्बरायणि शौशिरि टैटिकि रायणि ताक्ष्याणि वेलायनि वेदायनि गोदायनि मोदायनि चोदायनि गांगायनि कात्यायनि शालकंयनि स्तोकायनि तैकायनि मौजायनि करीरामि लानकिकालिरावषरातकि मौजहायनाः कताः। इत्येषामविवाह स्तेषां त्र्यर्षेणः प्रवरो भवति। विश्वामित्रकात्य कैलेति होता। विश्वामित्रवत् कातवत् किलवदित्यध्वर्युः ॥१५॥ (का.प.द., प्रवराध्यायः)

प्रतिज्ञासूत्रे परिशिष्टे। शाखा प्रवर्तककात्यायनस्तु अंगिरगणान्तर्भूतः[११३] कपिगणान्तर्गतस्तस्य प्रवराः आंगिरसबार्हस्पत्य कापेय इति विद्यन्ते।

तृतीयस्तुकात्यायनः पाणिनीयसूत्रेषुयोवृत्तिर्विरचितावार्तिकमिति नाम्नाविख्याता । अस्योल्लेखः कथासरित्सागरे वररुचिरित्यनेन नाम्ना सम्प्राप्यते । तत्र विद्यते कथानकं सौमदत्ताद्वसुदत्तायां सम्प्राप्य एष शंकरगणस्य पुष्पदन्तस्यावतार इति । श्रुतधर इत्यपरं नाम तत्रोल्लिखितं च । एष वररुचिरथ च कात्यायनसुतो वररुचिरनयोर्मध्ये विद्यते व्यक्तिभेदः । वार्त्तिककारककात्यायनो भृगुगणान्तर्गतो वात्स्यायनगणान्तर्गतोऽस्य प्रवराः भार्गवच्यवनाप्रवानेत्यादयो विद्यन्ते।[११४] एतेन— परिशिष्टकारः कात्यायनः शाखाप्रवर्तकादथ च वार्तिककारादन्य एवेति स्पष्टम्।

याज्ञवाल्क्यशिष्यपरम्परायां द्वापरे पुत्रत्वेन दत्तः कात्यायनो नाम ऋषिरभवत्। तेन च वाजसनेयशाखिनां श्रौतग्निकर्मसाधनपद्धितिदर्शकानि सूत्राणि कल्पसूत्रं, अष्टादशपरिशिष्टसूत्राणि च कृतानि । तदनुरोधेनैवेदानींतनानां वाजसनेयिनामाधानादि श्रौतं कर्म प्रवर्तते। तथा कात्यायनशिष्यानुयायी पारस्करनामा परमर्षिः कलेरारम्भकाले जातः। तेन स्मार्ताग्निकर्मपद्धतिनिदर्शकानि सूत्राण्युपनिवद्धानि । तदनुरोधेनैवेदानीं वाजसनेयिनां गर्भाधानादि षोडशसंस्कारकर्माणि प्रवर्तन्ते।

अत्र केचित् प्रमाणान्तरानुपलम्भात् वृद्धपरंपरोपदेशप्रसिद्धा कात्यायन एव वररुचिनाम्ना पारस्करनाम्ना च ख्यात इत्यध्यवसीयते।

**वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।**

---

११३. अथां गिरसोभारद्वाजाः कपयः—

कुशायरि पञ्चजलि कलसि सासवि संश्रयि जलसंवि सावकश्यायन्यामौलितंकि विदिदण्डि सलिसालि शक्ति भूवसि सौजटि राजकेशि भोजसि कपिस्तर स्वस्तिर जलन्धव कुशितक विन्दुर्ध्वस्त कण्व वान्यायन मात्स्यायन, तैत्तिरायण वेतलयनै तिशायनीनां कारीरयौ भाजिनस्तरस्विनस्तण्डिनः कारयाः कपरयः शारकणाः इत्येषामविवाहस्तेषां त्र्यर्षेयः प्रवरो भवति । आंगिरारसा महीयौ वोरुक्ष्येति होता। आंगिरोवदामहीयवदुरुक्षेयवदित्यध्वर्युः ॥८॥ (का.प.द., प्रवराध्यायः)

११४. कातीयपरिशिष्टदशकमित्यस्य ग्रन्थस्य भूमिकायां श्रीधराशास्त्रिण एवं लिखन्ति परन्त्वस्य पाठः प्रवराध्याये नोपलभ्यते। (का.प.द., भूमिका, पृ. ३) एतेनेद मनुमातु शक्यते यत्- तस्यभार्गवच्यावनादयः प्रवराः अतोऽयं कात्यायनः नूनं वात्स्यायनगणान्तर्गतः । एवमेव अंगिरसोभारद्वाजगणान्तर्गत कपिगणे कात्यायन नामालाभेऽपि तस्य प्रवरसाम्यत्वदर्शनात् सोऽपि कपिगणान्तर्ग एव।

प्रत्येकेषु गणेषु ये खलु मन्त्र द्रष्टारः सन्ति तेषामेव नामानि प्रवरेषु पठ्यन्ते। प्रवरशब्दस्य विग्रहो यथा प्रकृष्यश्चेतेवराः प्रवरा, अर्थात् गणेषु श्रेष्ठतमाः मन्त्रदर्शनात्।

**पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ॥**

इत्यभियुक्तोक्तेः । अथायं विश्वामित्रगोत्रोत्पन्न उक्तो हरिवंशे यथा—

**विश्वामित्रस्य च सुता देवरातादयः स्मृताः ।**

**विख्यातास्त्रिषु लोकेषु तेषां नामानि मेशृणु ।**

**देवश्रवाः कतश्चैव यतः कात्यायनाः स्मृताः ॥**

अत्र गर्गादिभ्यो यञ् यञन्तत्वात् यूनि लोहितादिकतन्तेभ्यः फक् तस्यायनादेशे निष्पन्नः कतर्षिगोत्रापत्यं युवा कात्यायन इति । अनेनैव महर्षियाज्ञवल्क्यप्रधानशिष्येण शुक्लयजुर्वेदकर्मणामनुष्ठानपद्धतिबोधकं षड्विंशत्यध्यायात्मकं कातीयं श्रौतसूत्रं गृह्याख्यं स्मार्त्तसूत्रञ्च प्रणीतं तथा अष्टादशपरिशिष्टानि पाणिनिसूत्रवार्त्तिकानि च निरमायिषत इति ।

जैमिनिसूत्रेण सह कात्यायनसूत्रस्य शब्दसादृश्यं अर्थसादृश्यं च दृश्यते । तेषां सूत्राणामुदाहरणं प्रस्तूयते—

**३.१.१. शब्दसादृश्यम्**

| **कात्यायनसूत्रम्** | **जैमिनीसूत्रम्** |
|---|---|
| अर्थद्रव्यविरोधेऽर्थसामान्यं तत्परत्वात् । | अर्थद्रव्यविरोधेऽर्थः । |
| अहर्गणे सुब्रह्मण्यायाः सर्वोफलक्षणं प्रकृतिवत् । | सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयादावाहनवत् । |
| उपगादर्शनाच्च । | उपगाश्च लिङ्गदर्शनात् । |
| कालान्तरेऽर्थवत्वं स्यात् । | कालान्तरेऽर्थवत्वं स्यात् । |
| चैत्र्यानन्तर्यात् । | आनन्तर्यात्तु चैत्री स्यात् । |
| छागं मन्त्राम्नानात् । | छागो वा मन्त्रवर्णात् । |
| दध्नः सङ्घातात् । | दधिसङ्घातसमान्यात् । |
| द्वादशाहः सत्रमहीनश्च । | सत्रमहीनश्च द्वादशाहः । |
| परार्थेष्वेकः कृतत्वात् । | परार्थान्येकः । |
| प्रकृतेर्वाऽनामत्वात् । | प्राकृतं वाऽनामत्वात् । |

| | |
|---|---|
| माघी वा क्रयश्रुतेः । | माघी वैकाष्टकाश्रुतेः । |
| रथकारस्याधाने । | वचनाद्रथकारस्याधाने । |
| विषये लौकिकमयुक्तत्वात् । | विषये लौकिकः स्यात् । |
| विष्णुर्वामास्यायां हौत्राम्नानात् । | विष्णुर्वा स्याद्धौत्राम्नानात् । |
| स तद्धर्मा कर्मयोगात् । | स तद्धर्मा स्यात्कर्मसंयोगात् । |
| सोमाच्चावभृथे । | तथावभृथः सोमात् । |
| होता वा वचनमन्त्रवर्णकारणेभ्यः । | होता वा मन्त्रवर्णात् । वचनाच्च । कारणानुपूर्व्याच्च । |

### ३.१.२. अर्थसादृश्यम्

| **कात्यायनसूत्रम्** | **जैमिनिसूत्रम्** |
|---|---|
| आहवनीययजतयो ध्रुवायाः । | ध्रौवाद्वा सर्वसंयोगात् । |
| एवं प्रवृद्धौ समं विभजेत् । | विवृद्धिः कर्मभेदात् । |
| कालातिक्रमे नियतक्रियाप्राप्तकालत्वात् । | दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् । |
| नित्यानुवादोऽनुयाजप्रतिषेधः । | नित्यानुवादो वा कर्मणः स्यात् । |
| पशोः सान्नाय्यस्य तदुक्तम् । | सान्नाय्यं वा तत्प्रभवत्वात् । |
| विक्रयी त्वन्यः शूद्रसंयोगात् । | विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् । |
| श्रुतिः क्रमादानुमानिकत्वात् । | श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वात् । |
| सङ्ख्याविकल्पो दानसंयोगे कृतत्वात् । | सङ्ख्यासु तु विकल्पः स्यात् । |
| हिरण्यगर्भ इत्यृचा स्रुवाघारः । | हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् । |

**अत्र विद्याधरमतं तु :—** सर्वे इमे सूत्रप्रस्थानरूपा धार्मिकग्रन्थाः प्रायश एकस्मिन्नेव द्वित्रिशतवत्सरपरिमिते काले रचिता इति तु प्रायशः सर्वेऽभ्युपगच्छन्त्येव । तत्रापि सूत्रान्तरकारेषु विचाररीतिं परित्यज्य पदार्थतत्क्रममात्रं प्रतिपादयत्सु महर्षिरयं कात्यायनो

विचारशबलितामेव यदा निरमात् तदा इदमवगम्यते— मीमांसासूत्रेण साकं कालतोऽस्य सन्निहितः कश्चन सम्बन्ध आसीदिति। तत्रापि जैमिनीयसूत्रैः साकमेव विशेषतः संवादात् तत्सूत्रसमकालिकानि किंचिदिव पूर्वोत्तरकालिकानि वा इमानीति प्रतीयते। तत्रापि सूत्राणाममीषां क्रमे कस्मिंश्चन विचार्यमाणे विचारशबलितानि सूत्राणि प्रथमं रचितानि, ततो विचारेण सिद्धं विषयमात्रमवलम्ब्य तदनुष्ठानक्रममात्रबोधनार्थं विचाररहितानि सूत्राणि तैस्तैः सूत्रकारैरारचितानि इति युक्ततरं प्रतिभाति। एवं च विचाररहिताद्यापस्तम्ब-बौधायनादिसूत्रकाराद्यपेक्षया विचारशबलितमिदं सूत्रं प्राचीनतरमित्यभ्युपगन्तव्यं भवति। तेन चापस्तंबाद्यपेक्षयाऽस्य प्राचीनत्वं सिद्धं भवति। आपस्तंबस्य च कालो विक्रमसंवत्सरात्पूर्वं दशमशताब्दी इति आपस्तम्बगृह्यसूत्रभूमिकायां काशी-चौखम्भामुद्रितायां मीमांसककेसरिभिः श्रीचिन्नस्वामिशास्त्रिभिर्युक्त्या साधितम्।

ततः पूर्वकालिकेनानेन वैक्रमात्संवत्सरात्पूर्वमेकादशशताब्दीगतेन द्वादशशताब्दीगतेन वा भाव्यमिति भाति। यद्येवमस्माद्वार्तिकप्रणेता भगवान् कात्यायनोऽन्य एवेति बलादायाति।

वार्तिककारोऽयं वैक्रमाब्दात्पूर्वं चतुर्थ्यां पञ्चम्यां वा शताब्द्यामासीदिति निर्णितं विमर्शकैः (भण्डारकार विल्वलकर इत्यादिभिः)। अतो वैक्रमाब्दात्पूर्वमेकादशशताब्दी गतेनास्मात्सूत्रकारेण कथं वररुचेः कात्यायनस्यैकत्वं भवितुमर्हति। उक्तयुक्त्या इतो वर्षसहस्रत्रितयात्पूर्वमस्मत्सूत्रकारो भूमिमिमामलंचकारेति गम्यते।

अस्यशुक्लयजुर्वेदीय श्रौतसूत्रप्रणेतुः कात्यायनस्य कालनिर्णयेऽपीदमित्थं वक्तुं न शक्यते। तथापि जैमिनीयसूत्रग्रन्थस्य तथा कात्यायनश्रौतसूत्रग्रन्थस्य चावलोकेनेनेदमनुमीयते यदनयोः जनिः स्वल्पव्यवधानेनाभूदिति।

यथा कात्यायनेन पूर्वं विचारशबलितानि सूत्राणि प्रथमं विरचितान्यथ विचारेण सिद्धं विषयमात्रमवलम्ब्य तदनुष्ठानक्रममात्रबोधनार्थ विचाररहितानि सूत्राणि रचितानि तथैव जैमिनीरपि निरमायि। अतः कस्तावत्प्राचिनः कच्चावाचीन इति सम्यग् न निश्चीयते।

अर्थ गम्भीररहितानि बौधायनापस्तम्बादिसूत्राणि नुनमर्वाचीनानीति। आपस्तम्बस्य कालो विक्रमसम्बत्सरात्पूर्वं दशमशताब्दी इति आपस्तम्बगृह्यसूत्र भूमिकां काशीचौखम्बामुद्रितायां मीमांसा केसरिभिः श्रीचिन्नस्वामिशास्त्रिभिः युक्त्या साधितम्।

ततः पूर्वकालिकेनानेन वैक्रमात्संवत्सरात् पूर्वमेकादशशताब्दीगतेन द्वादशशताब्दीगतेन वा भाव्यमितिप्रतिभाति। यद्येवमस्मद् वार्तिकप्रणेता भगवान्कात्यायनोऽन्य एवेति बलादायाति वार्तिककारोऽयं वैक्रमात्पूर्वं चतुर्थ्यां पञ्चम्यां वा शताब्द्यामासीदिति निर्णीं विमर्शकैः भण्डारकर विल्वलकर इत्यादिभिः। अतो वैक्रमाब्दात् पूर्व मेकादशशताब्दीतेनास्मात् सूत्रकारेण कथं वररुचेः कात्यायनस्य चैकत्वं भवितुमर्हति। उक्त युक्त्या इतो वर्षसहस्रत्रितयात् पूर्वमस्मात् सूत्रकार आविर्बभूवेतिगम्यते। अस्य कृतयो यथा—

| | |
|---|---|
| १. श्रौतसूत्रम् | २. श्राद्धकल्पः |
| ३. पारस्करगृह्यसूत्रम् | ४. ऋक्सर्वानुक्रमसूत्रम् |
| ५. शुक्लयजुः सर्वानुक्रमसूत्रम् | ६. यूपलक्षणम् |
| ७. छागलक्षणम् | ८. प्रतिज्ञासूत्रम् |
| ९. अनुवाक-संख्यासूत्रम् | १०. चरणव्यूहः |
| ११. श्राद्धकल्पः | १२. शुल्वम् |
| १३. इष्टकापूरणम् | १४. प्रवराध्ययनम् |
| १५. मूल्याध्यायः | १६. उञ्छशास्त्रम् |
| १७. निगमाः | १८. यज्ञपार्श्वे |
| १९. हौत्रम् | २०. प्रसवोत्थनम् |
| २१. त्रिकण्डिकारसूत्रम्[११५] | २२. कात्यायनस्मृतिः |
| २३. उपग्रन्थसूत्रम् | २४. प्रतिपदम्[११६] |
| २५. अनुपदम्[११७] | २६. यज्ञपार्श्वे |
| २७. ऋतुसंख्या | २८. भाषिकसूत्रम्[११८] |
| २९. मन्त्रभ्रान्तिहरसूत्रम्[११९] | ३०. यजुर्विधानम्[१२०] |

---

११५. त्रिकण्डिकं माध्याह्निकं नित्यस्नानविधिसूत्रम्।
११६. कात्यायनप्रणीतं औद्गातृसूत्रम्।
११७. पूर्ववत्।
११८. त्रिकण्डिकं ब्राह्मणाम्नायस्वरसन्धिप्रक्रियाबोधकं भाषिकसूत्रम्।
११९. सूत्रमन्त्रप्रकाशिका भ्रान्तिहरं वा त्रयोदशोत्तरशतश्लोकम्।

३१. उक्थशास्त्रम्

३२. कर्मप्रदीपः[१२१]

३३. ऋग्यजुषम्[१२२]

३४. त्रिकण्डिकासूत्रम्

३५. परिसंख्या

३६. गृह्यसंग्रहः

३७. प्रतिहारसूत्रम्

३८. स्वरव्यञ्जनम्

३९. सावित्रम्

४०. मन्त्रज्योति

४१. मन्त्रदीपिका

## ३.२. कात्यायनसम्बन्धे केषाचिद्भ्रमः

अयं कात्यायनः कल्पशास्त्राकारोऽन्यो वेति वार्त्तिककारकात्यायनादिति भ्रमः । किन्त्विदं भ्रमनिदानं तथ्यं नौपगच्छति, शुक्लयजुषः प्रतिशाख्यस्य रचयितापि कात्यायन एव प्रातिशाख्ये प्राणिनिव्याकरणसुत्रशादृश्यं विलोक्यते पाणिनेः समयः कात्यायनस्यैव समयः स्यात् पाणिनिशब्दः बौधायन प्रवराध्याये आगतोऽति अतोऽनुमीयते यत् पाणिनिः प्राचीनः, कात्यायनः यदि पाणिनेः पूर्ववर्ती स्यात्तर्हि तस्य शुक्लयजुषः प्रातिशाख्ये सूत्रशादृश्यं न स्यादिति, किन्तु सूत्रदृस्यं दृश्यते अतोऽयमेव कात्यायनः शुक्लयजुः प्रातिशाख्याकार वार्तिककारश्चेति नान्यः इति ।

श्री पुरूषोत्तमदेवेवजी महाशयेन त्रिकाण्ड शेषे लिखितं वर्तते यत् कात्यायनस्यऽपरपर्याव वाचिशब्दाः उभे सन्तीति ।

१. कात्यः, २. कात्यायनः, ३. पुनर्वसुः, ४. मेधाजित्, ५. वररूचिः कात्यशब्दः गोत्रशप्रत्ययान्तोऽस्ति, महाभाष्ये ३.२.३, यः कात्यशब्दः वार्तिककारसम्बन्धे आगतो वर्तते, कात्यायनयुवप्रत्ययान्तोऽस्ति महाभाष्ये ३.२.११८, अत्र कात्यायन शब्दः गोत्रप्रत्ययान्तोऽस्ति, कात्यायन वंशस्य मूल पुरूषः कत ऋषिरस्ति, यः बौधायन प्रवराध्याये, ऋग्वेदे च उपलभ्यते।

---

१२०. मन्त्राम्नायाधीतमन्त्राणां फलोद्देशेन काम्यकर्मबोधकं षडध्यायं यजुर्विधानम्।

१२१. छन्दोगपरिशिष्टं = त्रिप्रपाठकं कर्मप्रदीप इति नामान्तरम्।

१२२. ऋचां यजुषां च विभागप्रदर्शकं ऋग्यजुषम्।

वैदिकवाङ्गमये वहूनां कात्यायनपरपर्यायवाचीनि नामानि उपलभ्यन्ते यथा- १. कौशिक २. आंगिरसः, ३. भार्गवः, ४. द्वायामुष्यणः इत्यादीनि ।

स्कन्दपुराणान्तर्गतनागरखण्ड अध्याय १३० श्लोक ७१ इत्यनुसारेण कात्यायनः याज्ञवल्क्यस्य पुत्रोऽस्ति। याज्ञवल्क्यपुत्र कात्यायनेनैवश्रौतसूत्र धर्मसुत्रगृह्यसूत्र शुल्वसूत्र शुक्लयजुः प्रतिशाख्य पाणिनिसूत्र वार्तिक प्रवृतयी ग्रन्था: लिखिताः ते च कतिपयाः ग्रथाः सम्प्रति अपि उपलभ्यते। ते च यथा काात्यायनश्रौतसूत्रम् कात्यायनशुल्वसुत्रं पारस्करगृह्यसूत्रं कात्यायनधर्मसूत्रं शुक्लयजुः प्रतिशाख्यम् कात्यायनप्रवराध्यायः कात्यायन कारिका, कात्यायन प्रयोगः का. वेदप्राप्तिः, कात्यायन शाखाभाष्यम् कत्यायन संहिता कात्यायन सर्वतोमुखपद्धतिः कात्यायन मृतिः, कात्यायन अपरप्रयोगः कात्यायनी कल्पः कत्यायनतन्त्रम् कात्यायनी पद्धतिः कात्यायनीमहात्म्यम् कात्यायनी विवाह, कात्यायनोपनिषत् कादम्बः वररूचिकोषः वररूचिवाक्यम् ।

अतो ग्रन्थैककर्तृत्वेऽनेकग्रन्थकतृत्वे च प्रमाणानुपलम्भात् प्राप्तग्रन्थानामेव कर्तार इमे इति ज्ञातव्याः यथापि कल्पसूत्र कर्तृत्वादेतेषां कल्पशब्दाभिधीयमानां ग्रन्थानां रचयितार वासान्नित्येव प्रतीयते इति वाच्यम् । कात्यायन पूर्ववतिर्न इमे आचार्याः येषां नामान्युपलभ्यन्ते कात्यायन श्रौतसूत्रे । १. वात्स्यः २. वादरिः ३. भारद्वाज ४. काष्णाजिनिः ५. लौगाक्षिः ६. जातुकर्ण्यः ७. काशकत्सिनः इति । अत्र योऽयं जातूकर्ण्योऽस्ति, स जातुकर्णस्य पुत्रः वर्तते, जातूकर्णस्य समये ३००० वर्षं महाभरतस्येवसमयः अस्ति अतस्तत्पुत्रस्य जातूकर्मस्य समये न्युनो भविष्यति, यः कात्यायन श्रौतसुत्रेऽस्मि जातूकर्मयः ।

## ३.३. महाभारतकालीयो जातूकर्णः

**वलिवाकः सिनीवाकः सप्तवाकः कृतश्रमः ।**
**जातूकर्णः शिखावांश्च आलम्बः पारिजातकः**[१९] ।।

---

१९. महा.स.प्र ४.१४ ।

अतः महाभारतकालीनः कात्यायनो अस्तीति ज्ञायते । याज्ञवल्क्यस्मृतिरलोकावलोकनाद् धर्मसूत्रस्वयिता अपि कात्यायनः यथा - याज्ञवल्क्यस्मृतौ धर्मशास्त्रप्रयोजेषु कात्यायनः-

**मन्वत्रि विष्णु हारीत याज्ञवल्क्यो शनों गिराः।**
**यमापस्तम्बसंवर्ताः कात्यायन वृहस्पति ।।**
**पाराशरव्यासशंख लिखिता दक्षगौतमौ ।**
**शाताशरव्यासशंख वशिष्ठश्च धर्मशास्त्र प्रियोजकाः**[१२४] **।।**

महाभारतस्य कालः ३००० विक्रमाब्दात् पूर्व अस्तीति श्रीभगवद्दत्त रामगोविन्द त्रिवेद्रि प्रभृतयः ऐतिहासिका मन्यन्ते। युधिष्ठिरसमायां ये आचार्यः आसन्तेषा। अपि विक्रमाब्दात्पूर्व ३००० समयः अनेन निश्चीयते ।

यावत् वेदविभागकाल कश्चिद् विचारितः। वेदनिर्माणकाल सम्बन्धेऽस्माकं नियतप्रमाणत्वाभावात् नित्यत्वे एव वेदस्य निष्ठा । वेदविभागकालतः अर्वाचीनकालः ब्राह्मग्रन्थानां विद्यते, ततः श्रौतसूत्राणामिति कालः किन्तु सर्वेहमे ग्रन्थाः ऋषिप्रणीतत्वाद् वेदपरम्परायां वर्तमानत्वादिति तत्कार्मानुष्टानं संरक्षणसंवर्द्धनतत्पत्वाच्छ्त्वं वेदत्वन्च स्वीकुर्वाणाः वेदा एवति मन्यमानाः सन्ति भारतीयाः । अग्रे श्रौतसूत्रकाराणा जीवन्यां श्रौतकारकाल सिद्धत्वाच्छौतसूत्रकालः स्वतः एव निणीर्तः स्यात् ।

---

१२४. आचा. अ. ४।

### ३.४. आचार्यः कर्कोपाध्यायः

शुक्लयजुर्वेदीयसूत्रग्रन्थव्याख्यानपरम्परायां कर्काचार्यस्य विशिष्टतमं स्थानम् । विशेषतः कात्यायनश्रौतसूत्रस्य तथा पारस्करगृह्यसूत्रस्य च प्रतिष्ठां स्थापयित्वा कर्तृबाहुल्येन दृढतरत्वमित्यादीनां सम्पादने कर्काचार्यस्योद्यम एव कारणमिति निस्सङ्कोचं वक्तुं शक्यते । श्रौतयागपरम्पराया अनुयायी आचार्यः कर्कः तादृशः शक्तिसम्पन्न आसीत् येन शुक्लयजुःशाखीय श्रौतपरम्परा दृढबद्धमूलाऽक्रियत । अस्याः परम्परायाः कर्काचार्यः आधारशीलारूप एव इति कथनं नायुक्तियुक्तः ।

आचार्यः कर्कोपाध्यायः अर्वाचीनभाष्यकाराणां आदर्शभूतः । कथञ्चित् सूत्रे नोक्तं कर्कोपाध्यायेन प्रतिपादितञ्चेत् तन्मतं मुनिमतमिव प्रमाणित्वेन स्वीकुर्वन्ति भाष्यकाराः । अत एव संस्कारगणपतौ विद्वद्वरो रामकृष्णः ....... **कर्काचार्यहरिहरवासुदेवदेवयाज्ञिकरेणुदीक्षितानां मतं मुनिमतमिव शिष्टैरादियते । अत एवास्माभिर्मूलभूतं यत्र मुनिवाक्यं न लभ्यते । तत्रैतानि कर्कादिवाक्यानि एव शिष्टसंमतत्वाल्लिख्यन्ते । मुनिवाक्येभ्य उत्पन्नत्वात्**[१२५] इत्युल्लिख्य कर्कादौ श्रद्धावनतः सञ्जातः । नाति विपुलं नाति समासं वास्यभाष्यम् । श्रौततात्पर्यं सिद्धान्तानुसारमेव ज्ञापयति ।

यद्यपि कर्काचार्यात् पूर्वं भर्तृयज्ञपितृभूति-उपाध्यायपादप्रभृतयः यशस्विनो भाष्यकाराः अभूवन् तथापि कर्काचार्यस्य प्रादुर्भावः विलक्षणं महत्त्वं प्रकटयति । पूर्वोक्ता भाष्यकाराः सर्वेषु वैदिकवाङ्मयेषु अप्रतिहतगतिमन्तः प्रौढाश्चासन् परं कर्काचार्यः सर्वान् भाष्यकारान् अतिशय्य नूतनं प्रामाणिकं नेतृत्वं स्थापयामास । ततः आरभ्य कातीयश्रौतग्रन्थानां यावन्तः सिद्धान्तास्तेषां संरक्षणभारं स्कन्धयोरारोप्य निरतिशयेन वैदुष्येण कर्काचार्यः वहति स्म इति सत्यमेव वैदिकसमाजस्य गौरवविषयः । अस्मिन् कर्मणि कर्काचार्यः आशातीतं साफल्यं प्राप्तवान् इति । कर्काचार्यः कातीयसूत्रग्रन्थानां सिद्धान्तान् मीमांसादर्शनाधारेण याथातथ्येन विदुषां सम्मुखं प्रादर्शयत् । स्वोत्तरकालिकभाष्यकाराणां याज्ञिकानां च मार्गप्रदर्शकोऽभवत् । तदीयभाष्याध्ययनेन स्पष्टमिदं प्रतिभाति स्वकुलपरम्परा प्राप्ताया विद्यायास्संरक्षणं यथावदयमकरोदिति ।

---

१२५. संस्कारगणपति पृ. ११ ।

असौ कात्यायनाचार्यस्य महान् उपासकः। अत एव कातीयश्रौतसूत्रस्य मङ्गलाचरणे कात्यायनपादपांसूनां सर्वजयित्वं प्रकटयति :—

**त्रयीसुसंवित्तिविवेकनिर्मलाः।**
**समग्रनिःश्रेयससिद्धिहेतवः॥**
**समस्तशास्त्रार्थसतत्त्वबोधकाः।**
**जयन्ति कात्यायनपादपांसवः॥**[१२६]

तस्य कुलपरम्परा एव वैदिकज्ञानपूतः, तदानीन्तने समाजे कुलपरम्परागतविद्यायास्संरक्षणं लोकानां प्रधानं कर्तव्यमासीत्। विद्याग्रहणाय नान्यत्र तदानीं गन्तव्यं लोकैः। विषयोऽयं तदीयभाष्याध्ययनेन परिज्ञायते। तदीयभाष्ये नानाशास्त्राध्ययनजन्यं परिपक्वं वैदुष्यं समुपलभ्यते।

अनेनकृतं भाष्यद्वयं समुपलभ्यते। एकं श्रौतसूत्रभाष्यमपरं गृह्यसूत्रभाष्यम्। तस्मिन् भाष्यद्वये न कुत्रापि अनेन स्वपरिचयः प्रदत्तः। विद्वद्भिः अनेकैः अवान्तरसाक्षिभिः अस्य परिचयः संगृहीतः तथापि स न विश्वासपाकः, परिपूर्णश्च। ३२४ इशवीये अस्यावस्थितिरनुमीयते। हेमान्द्रिमहाभागेन विभिन्नेषु स्थलेषु कर्काचार्यस्य मतं उल्लिख्य समादरः प्रकटितः। अतः हेमाद्रेः पूर्वं अस्य स्थितिरासीत्।

**त्रयीसारसमुद्धारसूत्रव्याख्यानमाहृतम्।**
**यत्तन्मयानुगृह्णन्तु साधुत्वेनेह साधवः॥**[१२७]

कैश्चिदपि समीक्षकैः जन्मस्थानविषये परिवारविषये च निश्चितं मतं न प्रकटितम्। तत्र समस्या तु महती विद्यते न कुत्रापि कर्कविषये सूचना प्रामणिकी। सर्वेषामनुमानमेवात्र शरणम्। मीमांसाशास्त्र प्रकाण्डो मनीषी कर्कः दक्षिणदेशीयो मान्यवरश्चासीत्।

## ३.५. भाष्यशैली

कर्काचार्यस्य भाष्यशैली रचनाशैली विषयप्रतिपादनशैली च संक्षिप्ता क्लिष्टा च। चमाध्यायस्य प्रथमकण्किायाः द्वितीयसुत्रे आचार्यः कर्कः विद्वत्तापूर्णा व्यख्यां प्रस्तौति

---

१२६. का.श्रौ.सू. पृ.१ (क.भाष्यम्)।
१२७.

सुत्रञ्च वैश्वानरपार्जन्यौ निरूप्येच्छन्[१२८] इति अस्यैव व्याख्यां-वैश्वानर इति गुणतद्धित: सौविष्टकृत इतिवत् । ......... ...... यत्र यत्र वैश्वानरश्रवणं तत्र तत्रग्निगुणिनी देवता द्रष्टव्या । ........ ..... यत्कारणं वैश्वानरपार्जन्यौ प्रकृत्य द्विहविष्काऽन्वारम्भणीया इत्यामनन्ति । अन्वारम्भणीयायां (वैश्वानरपार्जन्येष्टौ) अन्वारम्भणीयाशब्द: तत्कार्यलक्षणार्थ:। तेनेच्छायाऽन्वारम्भणीयां करोति । इत्थं सामान्येन क्लिष्टताया उदाहरणम् । सूत्रान्तराणां शास्त्रान्तरणां वा वचांसि समुद्धृत्य विषयस्य वैपुल्ये कृतोऽपि तेषां सारल्याय नहि यत्नो विहित:। संक्षिप्तता चास्य भाष्यस्य महती विशेषता । यथा कुशप्रस्व: प्रस्तर: उपसन्नद्ध[१२९] इति सूत्रस्य व्याख्या शास्त्रान्तरवचनोपख्यापनेन समापिता वचनम्च - प्रसू: प्रस्तरं गृह्णाति इति वचनात्। मूलसूत्रस्यार्थमपि नैव प्रकाशयामास।

सूत्रार्थप्रकाशनाय प्रवृत्तोऽयमाचार्य: शास्त्रवचनानां संग्रहं चकार किल । प्रतिसूत्रं ब्रह्मणानां संहितानां च वचांसि एकीकृत्य स्वव्याख्याप्रामाण्यं सूत्रप्रमाण्यञ्च स्थापयामासेति विदुषां सम्मति : । तेन स्वीकृता: कानिचन वाक्यानि अद्य: प्रस्यूयन्ते ।

अत्र भगवतो भाष्यकृत: दृष्टि: शब्दनिर्वचने अर्थनिर्वचने च प्रसारिता दृश्यते । येन शब्दभावं[१३०] अर्थनिष्कर्षश्च प्रकटितो भवेत - कानिचन शब्दनिर्वचनपाराणि सूत्राणि भाष्याणि च समुपस्थाप्यन्ते - अपवृत्तकर्मा लौकिकोऽर्थ संयोगात्[१३१] अपवृत्तं यस्मिन कर्म स करणे चाविशेषात् प्रकरणशब्देन प्रक्रियन्ते यस्मिन् धर्मा इति । वैतानिकेषु सर्व: सर्वार्धत्वात्[१३२] वैतानिका वैतानादा आधानसंस्कृता अग्नय उच्यन्ते। द्रव्यं देवता त्याग[१३३] - ब्रीदियवपश्वादिद्रव्यम् तस्य द्रव्यस्य देवतां प्रतिया उत्सर्ग किया स याग:। यज्ञो याग इति चानर्थान्तरम् अस्मिन् एवार्थे लोके यज्ञशब्द: प्रसिद्ध:

---

१२८. का.श्रौ.सू ५.९.२ ।
१२९. पूर्ववत् ५.९.२० ।
१३०. पूर्ववत् १.३.२८ क.भा. ।
१३१. का.श्रौ.सू १.३.३० क.भा.
१३२. पूर्ववत् १.१.१८ ।
१३३. पूर्ववत् १.२.२ ।

। आचार्यः कर्कः स्वजन्मना कतमं देशमलञ्चकारोति नपार्यते वक्तुम् तथापि असौ आचार्यः अतिसूक्ष्म प्रतिभामण्डितः वैदिकसिद्धान्तशिरोमणिः इति निःसन्देहं वक्तुं शक्यते। मन्त्रब्राह्मणानुगतं कात्यायनश्रौतसूत्रमतं परिष्कृत्य भाष्य पौढित्वं स्थापयामास। सकलपरवर्तिनामाचार्याणां व्याख्याकारणां पथप्रदर्शकं विविधोहापोहैः ललितं कर्कभाष्यं युक्तिभिः श्रुतिसिद्धान्तैश्चानुमोदितं वर्तते। आचार्यः कर्कः सूत्रग्रन्थमवलम्ब्य व्याख्यानद्वारा वैदिकं वाङ्मयं प्रवर्धितवन्तः । मन्त्रब्राह्मणसम्मतं सूत्रभावं मीमासाशास्त्रैकसम्मतं विचारञ्च कर्कभाष्यस्य वैशिष्टयम्। श्रौतसूत्रासयं कर्कभाष्यभावञ्चाश्रित्य परवर्तिनो भाष्यकृतः यागाभिमतेषु विषयेषु लेखनीं व्यापारितवन्तः । यागक्रियायाः जटिल्यं सूत्रग्रन्थस्य च दुर्बोधतां परिहर्तुकामः कर्कः श्रौतगृह्यसूत्रयो भाष्यं प्रणिनाय । यथा व्याकरणशास्त्रे महाभाष्यं मीमांसासूत्रे शाबरभाष्य च विद्यते तथा श्रौतसूत्रे कर्कभाष्यं चकास्ति । असौ कर्कः कात्यायनाष्कृितं पन्थानमनुसृत्य गन्तुं कृतसङ्कल्पः यत्र यत्र कात्यायनः स्वसूत्रे यागस्वरूपं पदार्थस्वरूपञ्च यथा यथा प्रदर्शयति तत् तथा तथा अवगत्य तान् विषयान् स्वभाष्ये निबध्नाति ।

## ३.६. कर्कभाष्ये शास्त्रान्तरवचनानि

चतुर्मास्येषु वैश्वदेवं पर्व । प्रजापतिर्ह वा इदंमग्र एक एवास । प्रधासिनो हवामहे। चतुर्मास्यप्रयोगः फाल्गुन्याम्[१३४] चातुर्मास्यैरयत । वैश्वानरपार्जन्यौ निरूप्येच्छन्[१३५]। वैश्वानरोऽजोजनदग्निर्नो नव्यसीम् । पृष्टो दिवि पृष्टो अग्निः पृथिव्याम्। वैश्वानरः पशुपुराडाश। यदग्नय इति स्याददतितद्रेचयेत् । अग्नये पथिकृतेऽष्टाकपालं पुरोडाशम् । इद्राय वृत्राघ्न एकादशकपालामग्नये वैश्वानराय द्वादशकपालम्[१३६]। इन्दाय वृत्रघ्न एकदशकपालो वैश्वानरश्च[१३७] । यस्यग्निभिरन्यं

---

१३४. पूर्ववत् ५.१.१।

१३५. पूर्ववत् ५.१.२।

१३६. श.ब्र. ११.१.५.५।

१३७. का.श्रौ.सू. २५.४.४६।

याजयेयुर्योवा यजेत वैश्वानरं निर्वपेत् इति । पौष्णश्चरू: प्रपिष्टानाम्[१३८]। तस्माद्यं पूष्ण चरूं कुर्वन्ति प्रतिष्टानामेव कुर्वन्ति इति । एतानि सर्वत्र[१३९]। अथैतान्येव पञ्च हवींषि भवन्ति । वैश्वदेवी पयस्या[१४०] । अथ प्रातराग्नेय: पुराडाशो भवति मैत्रावरूणी पयस्या। शृते वा दध्यानयति। वायव्योऽग्नौ मैत्रावरूणोच । आसाद्याग्निमन्थनम्[१४१] । आसाद्या हवंष्यग्नि मन्थन्ति । आसाद्य हवींषि सममृशति । उत्तराघारमाघार्य जुह्वा ध्रवां समनक्ति । नवप्रयाज नवानुयाजम्[१४२] । नवप्रयाजं भवति नवानुयाजम् । पूर्वे द्युर्दक्षिणाग्नौ निस्तुषामभृष्टयवानां करम्भपात्रकरणम्[१४३] ।अथ पूर्वेद्युरन्वाहार्यपचनेऽतुषानिव यवान्कृत्वा तानीषदिवोपतप्य तेषां करम्भपात्राणि कुर्वन्ति[१४४]। गार्हपत्ये संस्कारा। छन्ना वसति[१४५] । अथैनां छादयति सा छन्नैतांरात्रिं वसति । स उत्तरस्वामेव वेदाउत्तरवेदिमुपकिरति । प्रत्यगतीत्य जुहोति[१४६] । प्रसूतोऽध्वर्य स्रूचावादाय प्रत्यङ्ङतिक्रमत्यतिक्रम्याश्राव्याह समिधो यजेति सोऽपबर्हिषश्चतुर: प्रयाजान्यजति । शुनासीरीयमत:[१४७] स यत्रैव साकमेधैर्यजते तच्छुनासीयेण यजेत । वायव्यं पय:[१४८] अथ वायव्यं पयो भवति । प्रतिधुक्श्रुते:[१४९] गोर्वै प्रतिधुक् तस्यै श्रृतम्। पुरस्ताद्वा पर्वण: पर्वणोऽन्ते वा[१५०]। महाहविषि माहेन्द्र । दशहवि:[१५१] सैतां दशहविषयमिष्टिमपश्यत्। प्रैषाश्च[१५२] स्विष्टकृति निगदं ब्रूयात् ।

---

१३८. पूर्ववत् ५.१.४।
१३९. पूर्ववत् ५.१.१०।
१४०. पूर्ववत् ५.१.१३।
१४१. पूर्ववत् ५.१.२१।
१४२. पूर्ववत् ५.२.७।
१४३. पूर्ववत् ५.३.२।
१४४. श.ब्र. २.५.२.१४।
१४५. का.श्रौ.सू. ५.४.१।
१४६. पूर्ववत् ५.८.१।
१४७. पूर्ववत् ५.११.१।
१४८. पूर्ववत् ५.११.५।
१४९. पूर्ववत् ५.११.७।
१५०. पूर्ववत् ५.११.३०।
१५१. पूर्ववत् ५.१२.२।

### ३.७. देवयाज्ञिकस्य परिचयः

कात्यायनश्रौतसूत्रस्य भाष्यप्रणेतुः देवयाज्ञिकमहाभागस्य जीवनवृत्तान्तमधिकृत्य किमपि संक्षेपेण विचार्यते।

तत्र भवान् भाष्यकारः पद्धतिकारश्च देवयाज्ञिकः स्वजीवनवृत्तौ न किमपि प्रकाशयामास । अतस्तस्मिन् विषये सर्वतोभावेन देवयाज्ञिकपरिचयं प्रकाशयितुं न पार्यते । तथापि केचन विषयाः तद्भाष्यावलोककन प्रकटयितुं शक्यते । तत्र भवा्न श्रौतयागमर्मज्ञो मनीषी देवयाज्ञिकः अग्निहोत्री आसीत् । अतः स्वयमपि बहुविधान् यज्ञान् सम्पादितवान् । श्रौतयागेषु अर्त्विज्यं कृत्वा महायाज्ञिक इति पदवीमपि अलञ्चकार । सततवेदशास्त्राभ्यासजनिता ज्ञानपरिपाकसहजा देवयाज्ञिकमतिः श्रौतकर्मणि निर्भया प्रसरति । लौकिककव्यवहारनिरीक्षणसमुत्पन्ना श्रौतयागकार्यभारक्षमा बुद्धिः कस्य मानसं नोद्बेलयति । अत एव सम्राट् स्थपति इति विभूषणेन विभूषितः देवयाज्ञिकः प्रायः **अध्यायान्ते त्रिरग्निचित् सम्राट् स्थपति महायाज्ञिक श्रीप्रजापतिसुतयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ**[१५३] ..... इत्युल्लेखं कृतवान् । अनेन ज्ञायते यत् अग्निचयनयागकर्मणि निरतः असौ देवयाज्ञिकः असामान्य विद्वत्वरिष्ठ श्रौतयागवनकेसरी आसीदिति । अस्य देवयाज्ञिकमहोदयस्य गुरुः श्रीपतिरासीत् । अत एव श्रद्धयावनतः सन् सर्वत्र स्वगुरुं स्मारं स्मारं भाष्यमारचयत् । नागरकुले समुत्पन्नस्य अस्य भाष्यकारस्य पितुः नाम प्रजापतिरासीत्—

**कात्यायनं नमस्कृत्य गुरुन् श्री श्रीपतींस्तथा ।**

**पितरौ भाष्यकर्तृंश्च पितृभूत्यादिसंज्ञकान् ॥**

**कात्यायनप्रणीतेऽस्मिन् सूत्रे यज्ञप्रकाशके ।**

**प्रजापतेस्तनूजोऽहं कुर्वे व्याख्यामिमां स्फुटम् ॥**

**जयन्ति ते गुरोर्वन्द्याः श्रीपतेः पादपांसवः ।**

---

१५२. पूर्ववत् ५.१२.६ ।

१५३. देवयाज्ञिकभाष्ये अ. ३. (पुष्पिका) ।

**एषां प्रसादादज्ञोऽपि चापलं कर्तुमुद्यतः ॥**[१५४]

याज्ञिकदेवस्य देशकालयोः विषये निश्चिता स्थितिरस्माकं पुरतः नोपतिष्ठते। कैश्चन अस्य जन्म दक्षिणे अनुमीयते चेत् कैश्चन उत्तरभारते । अनेकशताब्दीपर्यन्तं मिथिलामीमांसकानां प्रधानं स्थानमवर्तत । विशेषतः शुक्लयजुर्वेदानामपि मिथिला मूलं स्थानमासीत्। अतः मिथिलभिजनोयं विद्वान् इत्यपि आशङ्कितुं शक्यते।

परन्तु भाष्यपुष्पिकासु याज्ञिकः स्थपति सम्राट् इत्यादिभिः विशेषणैः स्वपरिचयप्रदानात् स दाक्षिणात्यो भवितुमर्हति । गतासु कतिपयशताब्दीषु यज्ञस्य विस्तारः दक्षिणदेशेऽभूत् । तत्रत्या विद्वांसः यज्ञकर्मणि संलग्नाः सन्तः महान्तो यज्ञा अपि स्वकीययजमानकत्वे सम्पाद्य विशेषणैः विशेषिताः प्रप्यन्ते । असौ शुक्लयजुर्वेदाध्यायी तत्कर्मानुष्ठाता चासीत्। स्थपतिशब्दः बृहस्पतियज्ञकर्तारं बोधयति अतोऽसौ महान् याज्ञिक इति सहजतयावबुध्यते। एतादृशो महानुभावः दाक्षिणात्य इति अनुमीयते। पञ्चदशशताब्द्यां धरायामवतीर्ण इति च विदुषां मतम्।

याज्ञिकदेवः स्वभाष्ये पद्धतौ च स्वपूर्वजानां भाष्यकाराणां नामानि मतानि च सश्रद्धं स्वीकृत्या तेषां ग्राह्याग्रहयत्वं विवेचयति, सम्मानं च प्रकटयति। विशेषतः भर्तृयज्ञः आचार्यः, पितृभूतिः, कर्काचार्यः, हरिस्वामी, अनन्तदेव, इत्येते आचार्याः अस्य श्रद्धाभाजः— **कर्कमते- वपनस्य विकल्पः । भर्तृयज्ञमते- वपनं नियमेन ।** [१५५] **अत्राह पितृभूतिः- ग्रावद्रोणकलशादिकम् ।**[१५६] **इदं मे स्यादित्येवं ब्रवीतीति पितृभूतिः, तत्तु युक्ततरमिवाभाति ।**[१५७] **इदं मे कर्मेदं वीर्यं देवदत्तोऽहं सन्तनवानीति हरिस्वामिनः ।**[१५८]

असौ विपश्चित् पूर्वमीमांसाशास्त्रस्य महनीयचिन्तकः इति भाष्यावलोकनेन ज्ञायते। श्रौतयागस्य गूढविषयाः प्रयोगबहुलविषयाः वाऽस्य कृते करामलकवत् प्रतिभान्ति । नकेवलमनेन भाष्यमेव विहितमपि तु पद्धतिमपि विरचय्य शास्त्ररक्षणं प्रयोगपरम्परारक्षणञ्च

---

१५४. भाष्योपोद्घाते मङ्गलाचरणम् २-४।
१५५. दे.प. पृ. २५।
१५६. पूर्ववत् पृ. २९२।
१५७. पूर्ववत् पृ. ३१३।
१५८. पूर्ववत् पृ. २६।

आचरितम् । मीमांसितव्या विषया अपि सुबोधतया मीमांसिता इति भाष्ये प्रथितमेव । वैदिकवाङ्मयस्य शास्त्रान्तरस्य च प्रौढपाण्डित्यं देवयाज्ञिकभाष्ये चकास्ति।

देवायज्ञिकमहोदयस्य विषये न पर्याप्तमध्ययनं वैदिकविद्वद्भिः विहितं दृश्यते। अनेन वैदिकसमाजउपकृत इति न तिरोहितम् तथापि वाङ्मयसेविनः विदुषो विषये वैदिकपक्षपातिनां विपश्चितां दृष्टिपातः शीघ्रमेव भवेत् येन भाष्यरक्षणं यागरक्षणं च जायेत।

कातीयसूत्रभाष्यकारेषु याज्ञिकदेवस्यैकमैतिहासिकं स्थानमस्ति । वैदिकवाङ्मयस्य प्रत्येकं छात्रः एतस्य विषये यत्किञ्चिज्जानात्येव । अनेन प्रणीतात् भाष्यात् बहवो वैदिका उपकृता अभूवन्।

कर्कवत् याज्ञिकदेवोऽपि श्रौतसूत्रभाष्यकृत् विद्यते । चिरन्तनेषु कालेषु सामाजिकजनानां प्रवृत्त्यनुसारेण वैदिकवाङ्मयस्य व्याख्याने परिवर्द्धने च विदुषां प्रवृत्तिरासीत् । परम्परायां याज्ञिकदेवमहाभागः न केवलं वेदमर्मज्ञविद्वान् अभवत् किन्तु उपदेशकः आचारपरिपालकश्चासीत्। तदीयवृत्तान्ते न ज्ञायते यत् स स्वयं भगवतो यज्ञनारायणस्य महान् उपासक इति। स्वप्रणीते भाष्ये पद्धतौ च प्रणयनकारणं उद्देश्यञ्च ददानः लिखति—

**प्रजापतेस्तनूजोऽहं कुर्वे व्याख्यामिमां स्फुटम्।**

**आलोच्यसूत्रभाष्यादि क्रियते संग्रहो यतः ॥**

**स्वकल्पितत्त्वशङ्कात्र न कार्या विबुधैरतः।**

वैदिकसाहित्ये परां भक्तिमादधानोऽयं याज्ञिकं श्रौतसूत्रस्याशयं रक्षणाय व्याख्यामकरोत्। न केवलां व्याख्यानेन सन्तुष्टः पद्धतिमपि अरीरचत्—

**प्रणम्य विघ्नहर्तारं गुरुँश्च श्रीपतींस्तथा।**

**कात्यायनस्य सूत्रस्य पद्धतिः क्रियते मया। इति।**

अनेन प्रणीतयोः व्याख्यापद्धत्योः अप्रतिहतप्रसरं वैदुष्यं प्रस्फुरति । यज्ञविषयकं जाटिल्यमपि सहजतया बोधयितुं प्रवृत्तोऽसौ याज्ञिकः वैदिकसिद्धान्तान् सम्यक्तया प्रतिपादयति । यत्र तत्र श्रद्धास्पदानां पूर्वजानां भाष्यकाराणां नाम सिद्धान्तञ्च गृह्णन् स्वस्य गौरवं प्रतिष्ठाञ्चावद्योतयति । तदीयभाष्ये व्यवहारे च एकतामनुभवामः । याज्ञिकः

यावज्जीवनं विशुद्धकर्मयोगी सन् वैदिकवाङ्मयस्य चिन्तकोऽभवत् । तदीय सिद्धान्त न केवलं भाष्यप्रणयने अपितु नित्यजीवनचर्यायां सम्बद्ध आसीत्।

वेदसंरक्षणैकतत्परो याज्ञिकः शास्त्रीयमान्यतासु स्वल्पमपि आघातं नान्वमन्यत, अपितु तासु विशिष्टं स्थानं अकल्पयत्। कानि चन उदाहरणानि अत्र प्रस्तूयन्ते-

**इदमिदानीं चिन्त्यते किमिदं पयो धर्मवद्भवत्युत लौकिकमिति किं तावत्प्राप्तं सूत्रेणैव पक्षः—**

**लौकिकं प्रतिधुक्श्रुतेः ।७। तत्पयो लौकिकं भवति, शाखान्तरे वायव्यं पयः प्रतिधग्भवतीति श्रूयते, प्रतिधुक्शब्देन तत्कालदुग्धं धारोष्णं पयोऽभिधीयते । यदि च धर्मवत्क्रियते तदा आज्यनिर्वापानन्तरं दोहः प्राप्नोति परिक्षालननिनयनं श्रपणं च अतश्च प्रतिधुक्त्वं विरुध्यते। अतो लौकिकमेवेति प्राप्तऽआह।**

**नाविरोधात् ।८। एतत्पयो लौकिकमसंस्कृतं न भवति किंतु प्राकृतपयोधर्मकृत् न हि धर्मेषु क्रियमाणेषु प्रतिधुक्त्वं विरुध्यते। नन्विदानीमेवोक्तम् कालश्रपणादयो विरुध्यन्तऽइति। सत्यम् प्रदानकालऽएव शुनासोरयागानन्तरं दोहः करिष्यते । अधिश्रयणपरिक्षलननिनयनश्रपणवर्जिताः सर्वे धर्माः करिष्यन्ते । तेन धर्मवद्भविष्यति । प्रतिधुक्त्वस्यापि विरोधो न भविष्यतीति।**

**प्रकृतिदर्शनाच्च ।९। प्रकृतावपि प्रकरणपठितानां धर्माणां मध्ये यावन्ती न विरुध्यन्ते तावतां क्रिया दृष्टा यथा प्रातर्दोहऽएवातञ्चनवर्जितानामिति । अतः शुनासीरयागानन्तरमेव प्रतिधुक्त्वाविरोधिभिर्मैरुपेतो दोहः कर्तव्य इति।**[१५९]

महायाज्ञिकदेवकृतं कातीयसूत्रभाष्यं वैदिकवाङ्मये महत्स्थानं बिभर्ति। अस्य कृतिषु कातीयश्रौतसूत्रस्य एकादशाध्यायं यावत् भाष्यं समुपलब्धमस्ति । डा. अल्बेर्तेन वेबेरेण संशोध्य वाराणसीतः प्रकाशितं भाष्यं[१६०] तथा विद्याधरशर्मणा सम्पाद्य वाराणसीत एव

१५९. देवयाज्ञिकभाष्ये पृ. ५३९।
१६०. चौ.सं.सी. वाराणसी वि.सं. २०२९।

प्रकाशिता चतुर्विंशतिअध्यायात्मिका पद्धतिः, कातीयछन्दःसूत्रस्य भाष्यं च[१६१] समुपलभ्यते। अस्य कृतौ याज्ञिकदेव इत्युल्लेखे सत्यपि देवयाज्ञिक इति नाम प्रथितं दृश्यते। वेबेरेण याज्ञिकदेव इत्येव उल्लिखितम्। परन्तु तत्र भवता विद्याधरेण देवयाज्ञिक इत्युल्लेखः कृतः। अस्य विदुषः कात्यायनश्रौतसूत्रस्य भाष्यं पद्धितिञ्चाधारीकृत्य तद्वैशिष्ट्यं विचिन्त्यते। अभियुक्तानामुक्तिर्विद्यते यत्—

**अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्।**

**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥**

सत्यं कोऽपि विषयः सूत्रेषु नैव व्याख्यारूपेण प्राप्यते। केवलं संकेतरूपेण शब्दमुखेन वोपलभ्यते। तेषां सूत्राणां भावप्रकटनं तात्पर्यकथनमर्थप्रकाशनञ्च भाष्यकृतां कार्यमिति निःसन्देहः। तत्र भवता याज्ञिकदेवाचार्येण पूर्ववर्तिभिः भाष्यकारैः कृतं प्रामाणिकं भाष्यमालोच्यैव तन्न्यूनतां परिहाराय पद्धतिसहितं भाष्यमारचितम्। अत्र प्रथमाध्याये आचार्यैः संक्षिप्य निर्दिष्टो विषयः याज्ञिकवर्येण स प्रसङ्गं विचारो विहितः। तत्र मीमांसासिद्धान्तस्यापि निष्कर्षविचारः समुपस्थापितो विद्यते। एकैकस्यापि सूत्रस्य न केवलमर्थप्रकाशनमपितु रहस्यप्रतिपादनमपि तत्र भवतः अभीष्टमासीत्।

## ३.८. देवयाज्ञिकभाष्ये व्याकरणप्रक्रिया

श्रौतसुत्रेस्यास्यभास्ये कर्कदेवयाज्ञिकविद्याधरैः संक्षेपेण व्याकरण प्रक्रिया प्रदर्शिता। संहितायाः ब्राह्मणस्य च भाष्येषु आचार्येण सायणेन अविकल व्याकरणपद्धतिः प्रदर्शिता न तादृशी अवस्था श्रौतसूत्रभाष्येषु। तेषु त्रिष्वपि भाष्यकारेषु व्याकरणप्रक्रियायाः आधिण्यं देवयाज्ञिकभाष्ये प्राप्यते। देवयाज्ञिकमहोदयेनापि प्रतिसूत्रं प्रतिपदं वा अविकलं शब्दनिर्मितिस्वरूप नैव प्रदर्शितम् तथापि श्रौतसूत्रभाष्ये आपाततः शब्दविशेषस्य व्याख्या व्याकरणानुसारेण प्रदर्शिता। तेषां शब्दानां मध्ये दिग्दशनमेवात्र विधीयते।

---

१६१. चौ.सं.सी. वाराणसी वि.सं. २०६१ (पुनर्मुद्रित)।

चातुर्मास्यशब्दस्य **व्याख्यानक्रमे** आचार्यो देवयाज्ञिक: लिखति - चतुर्षु चतुर्षु मासेषु भवति चातुर्मास्यानि इति व्युत्पत्य तत्रभवाधिकारे चर्तुमासाद् यज्ञेभ्यो वक्तव्य इति वार्तिकम्[१६२] ।

प्रचीनप्रवणे प्रचीनं प्रवणं निम्नं यस्मिन् असौ प्रचीनप्रवषोदेश: तस्मिन् प्रचीनप्रवणे [१६३] । अहतवासा- अहते वाससी यस्यासौ अहतवासा एकं परिधानीयं द्वितीयमुत्तरीयम्[१६४] ।

अपरेण दक्षिणाग्नि ........... वर्चस इति । शयनकाले गवि पृथिव्यां दीयते निधीयते स्थाप्यते इति गोदानम् । दक्षिणकर्णसमीपवर्तिनं शिर: प्रदेशत्यिथ:[१६५] ।

अनैडकीरूर्णा: प्रक्षाल्याश्लेषयेत्तयो: एडको नाम दक्षिणपथे मेषांकृति: पशु: एडकस्येमा: एडक्य: न ऐडव्य: अनैडन्य:। अनैडकीरूर्णा मेषरोमणि।
प्रदेशोऽन्तरा अङ्गुष्ठतर्जनीभ्यां प्रसारिताभ्यां प्रादेश उच्यते[१६६] ।सत्बसरं वा यजेत ....... ...... सम्बत्सरमिति कालाध्वनोरत्यन्त संयोगे इति द्वितीया[१६७]। साकल्येन संयोगश्चात्यन्त संयोग इत्युच्यते।

एवमाद्या व्याकरण प्रक्रिया देवयाज्ञिकभाष्ये दृश्यते । अत्र केवलमुदाहरणाथमेव दिग्दर्शनं कृतम् । ययारीत्य सूत्रभावं प्रकाश्यते सा रीति भाष्यकारेणावलम्विता । शास्त्रान्तरवचनानामपि प्राचुर्य संकलनं भाष्यस्यास्य वैशिष्टयम् । देवयाज्ञिकमहोदय: सर्वत्र स्वशाखीयं विषयं प्रदयति। भाष्यकारणामपि खण्डनं मण्डनं वा स्वशाखीयरीत्या करोति । कानिचन उदाहरणनि अध: प्रस्तुयन्ते- जुहोति धर्मेण मेषमिथुनं संस्कारणीयमिति श्री अनन्तयाज्ञिका: हरिस्वम्यभिमतश्चायं पक्ष: यत: स एवाह अवदानेन सह मेषमवदधातीति होमसम्बन्धोऽवदानसम्बन्धान्येषस्य होतव्यत्वात् अवदानस्य ततश्च सोऽपि वरूणायैव होतव्य यागसम्बन्धाभावाच्च न यागहविर्धमा:

---

१६२. का.श्रौ.सू. ५.१.१ (दे.भा.)।
१६३. दे.भा.का.श्रौ.सू ५.१.२१।
१६४. पूर्ववत्
१६५. पूर्ववत्
१६६. पुर्ववत् ५.३.१०।
१६७. पूर्ववत् ४.४.२५।

कार्या इति ककाचार्यसम्प्रदायकारादिमते यागसम्बन्ध एव तेषां मते समन्त्रकारस्तयोर्यागधर्मा भवति[१६८] ।

यस्य कस्यापि कर्मणः तुलनात्मकं व्याख्यानं देवयाज्ञिकमहोदयस्य नैजं माहात्म्यम् । यथा शाखान्तरालोचना दृश्यते । शाखान्तरे च पयस्योत्पत्तौ अस्यैव प्रकारस्य दर्शनादिदमपि न निर्मूलं तथा चापस्तम्ब तप्ते प्रातर्देहि सायं दोहमानीयवीति मानवे च सर्वत्र पयस्योत्पादनस्यायमेव प्रकारः - तथा च न सम्प्रदायो व्यवस्थित इति श्रुतौ पयस्यानिष्पादन प्रकारस्यानुपदेशात् शाखान्तरश्रुतिनिर्णयः[१६९]।

## ३.९. आचार्यः विद्याधरशर्मा

इह जगतीतले जलबुद्बुदवत् कति जनाः प्रतिक्षणं उत्पद्यन्ते विलीयन्ते च। परं तेषां जन्म धन्यं येषां जन्मना वेदवाङ्मयस्य वैजयन्ती उत्तुङ्गतरा भूत्वा दोधूयते। आचार्यो विद्याधरः तेषु अर्वाचीनेषु विपश्चिद्वरेषु अन्यतमः । असौ यावज्जीवनं वाग्देव्याः वेदवाण्याः कोशं सम्बर्द्धयितुं प्रयतमान अभवत् । भगवतो वेदनारायणस्य समुपासकः विद्याधरः वैदिकवाङ्मयस्य संरक्षणे सम्बर्द्धने च अग्रगण्य अभूत्।

हरियाणाप्रान्तस्य पुठिग्रामे १८८६ खिष्टीयवर्षे लब्धजनिरसौ प्रभुदत्तगौडनाम्नो पितुः पुत्रः आसीत् । विश्रुतकीर्तिभ्यः स्वपितृभ्यः प्रभुदत्तेभ्यः विधिवदधीतवेदशास्त्रो विद्याधरः प्रख्यातनामा विद्वान् अभूत् । वेदाङ्गानां मीमांसादर्शनस्य चाध्ययनं स्वपितृभ्यः तथा विविधविद्वत्तल्लजेभ्यः सम्पन्नमकरोत् । बाल्यादेव प्रतिभावैभवसम्पन्नः विद्याधरः शुक्लयजुर्वेदस्य अष्टविकृतौ समर्जितवैदुष्य आसीत् । स्वल्प एव वयसि अध्यापनाय प्रार्थितोऽसौ विद्वान् कलकत्तायां कतिचनसमयान् अध्यापयामास । तत्र वेदमध्याप्य पुनः काशीमागत्य अध्ययाध्यापने निमग्नः अभवत् । असौ श्रौतयागविद्यायां पारावारीण इति अवगम्यते। अनेन महान्तोऽपि श्रौतयागाः स्वाचार्यत्वे सम्पादिताः। काश्यां लब्धप्रतिष्ठोऽसौ वेदाध्यापने नैरन्तरेण संलग्नः आसीत्। अनेन काश्यां बहुषु विद्यालयेषु विश्वविद्यालये च

१६८. पूर्ववत् ५.३.८।

१६९. का.श्रौ.सू. ४.४.८ (दे.भा.)।

वेदोऽध्यापितः । तेषु ज्ञानवापीनिकटस्थः सत्यनारायणवेदविद्यालय-गोयनकासंस्कृतमहाविद्यालय-रामदयालसंस्कृतविद्यालयाः प्रामुख्यं भजन्ते।

विदुषां पूजकः मालवीयमहाभागः काशी हिन्दूविश्वविद्यालये प्रधानाध्यापकं नियुज्य पश्चात् धर्मविज्ञानविभागे अध्यक्षपदे च नियुक्तवान् । तत्पदमपि परित्यज्य संन्यासीमहाविद्यालये वेदवाङ्मयस्य शब्दसपर्यां चकार । अयं महाभागः न केवलं वेदाध्यापकः अपि तु वेदप्रचारकश्च । महाविद्यालयेषु चतुर्वेदध्यापनपरम्परायाः प्रेरकः परीक्षाप्रणाल्याः मार्गदर्शकश्च । अस्य जीवनं सारल्यं विनीतं विद्यामन्दिरञ्चासीत् । वेदविद्यायाः पारावारीणः, प्रयोगमर्मज्ञः, ग्रन्थप्रणेता विद्याधरः महामहोपाध्याय उपाधिना विभूषित आसीत्।

विद्याधरः महान् विचारकः ग्रन्थप्रणेता च अभूत् । नैकविधाः कर्मकाण्डीयविषयाः अनेन संशोधिताः नवीना पद्धतयः प्रणीताश्च । कात्यायनश्रौतसूत्रस्य शुल्वसूत्रस्य च सरलावृत्तिः महत्त्वपूर्णा कृतिः विद्याधरस्य।

संस्कृतशिक्षायां महती श्रद्धा विद्यते स्म। संस्कृतस्य रक्षायै प्रचाराय च अस्य कार्याणि प्रवृत्तानि आसन् । सम्भाषणादिव्यवहारमपि संस्कृतभाषया एव स्यादिति धिया तदनुकूलं व्यवहारं करोति स्म।

ह्रासोन्मुखीं मानवबुद्धिं विचार्य सरलतया सुबोधतया च प्रणीता सरलावृत्तिः कातीयश्रौतसूत्रस्य भावप्रकाशिका विद्यते । आवश्यकतानुसारेण समासवृत्तिः व्यासवृत्तिश्च सूत्राणां पाठकानां च मनः आवर्जयतः । सावधानतयाऽवबोधो भवति । अस्या वृत्तौ शास्त्रान्तराणामपि प्रयोगः कृतो दृश्यते विषयावबोधनार्थम् । विद्याधरः वृत्तिलेखनक्रमे यथावकाशं पूर्ववर्तिनामाचार्याणां भाष्यस्योपयोगमपि कृतवान् । सूत्रान्तराणां सप्रसङ्गं ग्रहणं कृत्वा स्वकीयं वैदिकपाण्डित्यं सूचयामास । अनेन रचितायां सरलावृत्तिभूमिकायां *बोधगम्यभाषायां कातीयश्रौतसूत्रविषयस्य समग्रसिद्धान्तः अनुष्ठेयकर्मविषयश्च* प्रदत्तो *विद्यते* । याज्ञिकपद्धतिमपि स्ववृत्तौ विद्याधरः प्रत्यपादयत्। अनेनैव कारणेन सरलावृत्तेः गौरवमस्ति वैदिकेषु।

आचार्यः विद्याधरः वैदिकपरम्परायाः याज्ञिकसम्प्रदायस्य च यथार्थवेत्ताऽसीत्। अतः शुक्लयजुर्वेदीयपरम्परानुसारेण रचिता सरलाटीका महत्त्वपूर्णा वरीवर्ति।

विद्याधरः स्वभाष्ये यथा विषयाः सारल्येन प्रकटितो भवेत् तथैव भाषा सौष्ठ्वमपि प्रेषणीयं स्यादिति अचिन्तयत्। प्रतिसूत्रं विषयशीर्षकं तथा प्रकरणशीर्षकञ्चोपस्थाप्य शतपथवचनं, शाखान्तरवचनं, स्मृतिवचनं वा उल्लिख्य सूत्रतात्पर्यं प्रकटयामास। टिप्पण्यां केचनविषयाः विवेचिताः। यथा :- कास्यभोजिन्यायबोधनाय टिप्पणीमारचयति- गुरुच्छिष्टभोजनं शिष्यस्य विहितम्। स च शिष्यः कांस्यपात्रे एवं भोजनं कुर्याम् इति नियमं गृहीतवान्। गुरोस्तु अनियमः। एवं च **गुरुच्छिष्टभोजिनं कांस्यपात्रे एव भोजनं नियम्यते स कांस्यभोजिन्यायः**[१७०] इति रीत्या मूले समायातानां विषयाणां स्पष्टीकरणं कृतम्।

अन्यत् वैशिष्ट्यं भाष्ये समुद्धृतानां प्रमाणानां स्थलसंकेतः। सूत्रेऽपि केचन विषयाः आगताः तेषामपि स्थानसंकेतः अस्मिन् भाष्ये दृश्यते। भाष्यं सन् अपि पद्धतिमनुगच्छति। कतमं सूत्रं कं विषयं प्रतिपदयति इति स्पष्टप्रतिपादनमपि अत्रैव विहितमिति नात्र तिरोहितम्।

——— 0 ———

१७०. का.श्रौ.सू. ५.१.५ (भाष्यटिप्पणी)।